श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ फलस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ फलस्तबकः ॥

दुग्धां दुग्धाम्बुधेः पुत्री दुरितापहरा मम।
शार्ङ्गिणश्चरणाम्भोजशरणागतिसंपदम्॥ १ ॥

धावन्तमुच्चतरदुर्विषयाटवीषु
सारङ्गशाबमिव शश्वदपाङ्गजालैः।
मामच्युतस्य महिषि प्रसभं गृहीत्वा
नित्यं विधेहि युवरोरनुकूलवृत्तिम्॥ २ ॥

मातर्हिताहितविवेकविहीनमेतं
मन्दं मुकुन्दवरवर्णिनि मामनार्यात्।
मार्गान्निवर्तयितुमर्हसि मङ्क्षु माता
कूपे निपित्सुमपि डिम्भमुपेक्षते किम्॥ ३ ॥

विश्वस्य धात्रि भवती परिपास्यतीति
विश्वस्य सम्यगभयं तु वयं चरामः।
निःश्रेयसं गमय वा निरयं नयेर्वा
कीर्तिं लभस्व यदि वा महतीमकीर्तिम्॥ ४ ॥

उच्चैरकृत्रिमगिरो यदि नाब्धिघोषा
उन्मादिनां फणितयः स्मृतयश्च नो चेत्।
नारायणप्रणयिनीं नमतो मम त्वां
नैःश्रेयसी न भविता कथमम्ब संपत्॥ ५ ॥

गीतोपदेशगुरुपत्नि कृतागसो मे
गोप्त्री त्वमेव भवताद्भवतापभाजः।
आत्मावनेऽप्यकुशलैरपरैः सुरैः किं
बद्धः स्वयं किमु विमोचयिता बतान्यम्॥ ६ ॥

कर्माहृतिर्मतिरुपास्तिरिति प्रतीतैः
    मुक्तो मुकुन्दसुविलासिनि मुक्त्युपायैः।
अस्मादृशस्तव जगत्यनुकम्पनीयो
    नानापराधनिधिरम्ब न लभ्यतेऽन्यः॥ ७ ॥

पापार्थकोपकलुषीकृतनाथचेतः
    पाथः प्रसादनविधौ कतकायितोक्तिम्।
योऽहं भवामि सभयो यदुनाथयोषे
    तां त्वामनन्यशरणः शरणं प्रपद्ये॥ ८ ॥

निरतिशयविभूते देवि निष्किञ्चनोऽहं
    भवदवपरितप्तो भास्वरानन्दमूर्ते।
त्वदुपजनितबोधस्त्वज्जुषः कैटभारेः
    चरणनलिनयोर्मामेनमद्यार्पयामि॥ ९ ॥

महति भवती मामार्याणां कुले समजीजनद्
    भवपथपरिश्रान्तच्छायातरूननयद् गुरून्।
शरणवरणं साङ्गं शौरावचीकरदिन्दिरे
    किमिह बहुना संपूर्णो मे चिरेण मनोरथः॥ १० ॥

हृद्यं पद्यसहस्रमेतदनघं संशृण्वतः कम्पतां
    मोदेनादिमशाब्दिकस्य फणिनो मूर्ध्नां सहस्रं मुहुः।
तत्कालोदितचारुमारुतधुतत्वत्केलिगाढश्रमं
    प्रत्नं संप्रति मे प्रसीदतु रमे पक्षीन्द्रवाहं महः॥ ११ ॥

येयं नाद्रियते कृतिः कतिपयैरीर्ष्यागृहीतैर्जनैः
    चित्रं सैव विपश्चितामकलुषे चित्ते विधत्ते मुदम्।
विश्वस्याम्ब मनो दुनोति दयिताविश्लेषिणां या नृणां
    नो किं कोकिलकाकली भवति सा तोषाय योषाजुषाम्॥ १२ ॥

बहुस्तबकभासुरस्तव नवस्तवस्वस्तरुः
    प्रशस्तविबुधस्तुतस्त्रियुगनायिकेवस्तुतः।

समस्तमपि वाञ्छितं वितनुते सदानन्दन-
    स्थितिः सुरभिलै रसैरपि दिशो दशामोदयन्॥ १३ ॥

श्लोकाः श्लाघावसरतरलीभूतवेधःपुरन्ध्री-
    चूडागुच्छप्रसृमरमधुस्रोतसा जातसाम्याः।
विश्वाम्ब त्वद्गुणपरिचये वीततन्द्रान् सुधीन्द्रान्
    प्रीणन्त्येते मम परमनोभैरवा धीरवादाः॥ १४ ॥

अम्ब त्वद्गुणलेशपेशलमिदं डिम्भस्य मे जल्पितं
    साकं लोकपतिस्त्वया निशमयन्नाकं विधातुः पदम्।
मोक्षं चाननुरूपमेव गणयन् मोदान् महोदारधीः
    मन्ये सम्प्रति पारितोषिकमसावन्वेषयन्मे हरिः॥ १५ ॥

समस्तगुणशेवधेरमृतकल्पसूक्तेस्तव
    स्तवस्य परिशीलनात् फलमुपैति यः प्रार्थितम्।
लभेत यदि वेतनं सुरभिदुग्धदोहाज्जनः
    स काममुपमीयते जननि तेन नैवेतरः॥ १६ ॥

सानन्दं ये सरसमनसः स्वादु लक्ष्मीसहस्रं
    जेगीयन्ते जगति जनितश्रीनिवासप्रसादम्।
शान्तत्रासां विततिममितां शर्मणां निर्मिमाणा
    तेषामेषा विहरतितरामिन्दिरा मन्दिरेषु॥ १७ ॥

पौत्रेणात्रेयगोत्राभरणनयचणश्रीनिवासाध्वरीन्दोः
    श्रीमद्रामाङ्घ्रिभक्तिप्रमुदितरघुनाथार्ययज्वात्मजेन।
वेदान्ताचार्यपादाम्बुजनिहितहृदा वेङ्कटार्येण क्लृप्तं
    रम्यं लक्ष्मीसहस्रं पठत दृढतरं नित्यकल्याणकामाः॥ १८ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे फलस्तबकः ॥